अथ

महाकालशनिमृत्युञ्जयस्तोत्रम्

प्रकाशक

त्रिभूति प्रकाशन

गायघाट, वाराणसी

मुद्रक—भार्गव आफसेट, वाराणसी।

शनिमृत्युञ्जयस्तोत्रम्

श्रीगणेशाय नमः ॥ ॐ नमो मृत्युञ्जयाय ॥ नन्दिकेश्वर उवाच ॥ कैलासस्योत्तरे शृङ्गे शुद्धस्फटिकसन्निभे ॥ तमोगुणविहीने तु जरा-मृत्युविवर्जिते ॥ १ ॥ सर्वार्थ - संपदाधारे सर्वज्ञानकृतालपे ॥ कृता-ञ्जलिपुटो ब्रह्मा ध्यानासीनं सदाशिवम् ॥ २ ॥ पप्रच्छ प्रणतो भूत्वा जानुभ्यामवनि गतः ॥ सर्वार्थसम्पदाधार ब्रह्मा लोकपितामहः ॥ ३ ॥ ब्रह्मोवाच ॥ केनोपायेन देवेश चिरायुर्लोमशोऽभवत् ॥ तन्मे ब्रूहि महेशान लोकाना हितकाम्यया ॥ ४ ॥ श्रीसदाशिव उवाच ॥ शृणु

ब्रह्मन् प्रवक्ष्यामि चिरायुर्मुनिसत्तमः ॥ सञ्जातः कर्मणा येन व्याधि-मृत्युविवर्जितः ॥ ५ ॥ तस्मिन्नेकार्णवे घोरे सलिलौघपरिप्लुते ॥ कृतान्त-भयनाशाय स्तुतो मृत्युञ्जयः शिवः ॥ ६ ॥ तस्य संकीर्त्तनान्नित्यं मुनि-मृत्युविवर्जितः ॥ तमेव कीर्तयन् ब्रह्मन् मृत्युजेतुं न संशयः ॥ ७ ॥ लोमश उवाच ॥ ॐ देवाधिदेवदेवेश सर्वप्राणभृतांवर ॥ प्राणिनामपि नाथस्त्वं मृत्युञ्जय नमोऽस्तु ते ॥ ८ ॥ देहिनां जीवभूतोऽसि जीवो जीवस्य कारणम् ॥ जगतां रक्षकस्त्वं वै मृत्यु० ॥ ९ ॥ हेमाद्रिशिख राकार सुधावीचिमनोहर ॥ पुण्डरीकपरंज्योति मृत्यु० ॥ १० ॥ ध्या नाधार महाज्ञान सर्वज्ञानैककारण ॥ परित्रातासि लोकानां मृत्यु०

॥ ११ ॥ निहता येन कालेन सदेवासुरमानुषाः ॥ गन्धर्वाप्सरसश्चैव सिद्धविद्याधरास्तथा ॥ १२ ॥ साध्याश्च वसवो रुद्रास्तथाश्विनिसुतावुभौ ॥ मरुतश्च दिशो नागाः स्थावरा जङ्गमास्तथा ॥ १३ ॥ जितः सोऽपि त्वया ध्यानान्मृत्यु० ॥ १४ ॥ ये ध्यायन्ते परां मूर्तिम्पूजयन्त्यमरादयः ॥ न ते मृत्युवशं यान्ति मृत्यु० ॥ १५ ॥ त्वमोङ्कारोऽसि वेदानां देवानां च सदाशिवः ॥ आधारशक्तिः शक्तीनां मृत्यु० ॥ १६ ॥ स्थावरे जङ्गमे वापि यावतिष्ठति देहगः ॥ जीवत्यपत्यलोकोऽयं मृत्यु० ॥ १७ ॥ सोमसूर्याग्निमध्यस्थ व्योमव्यापिन् सदाशिव ॥ कालत्रय महाकाल मत्यु० ॥ १८ ॥ प्रबुद्धे चाप्रबुद्धे च त्वमेव सृजसे

जगत् ॥ सृष्टिरूपेण देवेश मृत्यु० ॥ १६ ॥ व्योम्नि त्वं व्योमरूपोऽसि तेजः सर्वत्र तेजसि ॥ ज्ञानिनां ज्ञानरूपोऽसि मृत्यु० ॥ २० ॥ जगज्जीवो जगत्प्राणः स्रष्टा त्वं जगतः प्रभुः ॥ कारणं सर्वतीर्थानां मृत्यु० ॥ २१ ॥ नेता त्वमिन्द्रियाणां च सर्वज्ञानप्रबोधकः ॥ सांख्ययोगश्च हंसश्च मृत्यु० ॥ २२ ॥ रूपातीतः सरूपश्च पिण्डस्थपदमेव च ॥ चतुर्युगकलाधार मृत्यु० ॥ २३ ॥ रेचके वह्निरूपोऽसि सोमरूपोऽसि पूरके ॥ कुम्भके शिवरूपोऽसि मृत्यु० ॥ २४ ॥ क्षयङ्करोऽसि पापानां पुण्यानामपि वर्द्धनम् ॥ हेतुस्त्वं श्रेयसां नित्यं मृत्यु० ॥ २५ ॥ सर्व-मायाकलातीत सर्वेन्द्रियपरावर ॥ सर्वेन्द्रियकलाधीश मृत्यु० ॥ २६ ॥

रूपं गन्धो रसः स्पर्शः शब्दः संस्कार एव च ॥ त्वत्तः प्रकाश एतेषां मृत्यु० ॥ २७ ॥ चतुर्विधानां सृष्टीनां हेतुस्त्वं कारणेश्वर ॥ भावाभावपरिच्छिन्न मृत्यु० ॥ २८ ॥ त्वमेको निष्कलो लोके सकलं भुवनत्रये ॥ अतिसूक्ष्मातिरूपस्त्वं मृत्यु० ॥ २९ ॥ त्वं प्रबोधस्त्वमाधार त्वद्बीजं भुवनत्रयम् ॥ सत्वं रजस्तमस्त्वं हि मृत्यु० ॥ ३० ॥ त्वं सोमस्त्वं दिनेशश्च त्वमात्मा प्रकृतेः परः ॥ अष्टात्रिंशत्कालानाथ मृत्यु० ॥ ३१ ॥ सर्वेन्द्रियाणामाधारः सर्वभूतगुणाश्रयः ॥ सर्वज्ञानमयानन्त मृत्यु० ॥ ३२ ॥ त्वमात्मा सर्वभूतानां गुणानां त्वमधीश्वरः ॥ सर्वानन्दमयाधार मृत्य० ॥ ३३ ॥ त्वं यज्ञः सर्वयज्ञानां त्वं

बुद्धिर्बोधलक्षणा ॥ शब्दब्रह्मस्त्वमोङ्कारो मृत्यु॰ ॥ ३४ ॥ श्रीसदाशिव उवाच ॥ एवं सङ्कीर्त्तयेद्यस्तु शुचिस्तद्गतमानसः ॥ भक्त्या शृणोति यो ब्रह्मन् न स मृत्युवशो भवेत् ॥ ३५ ॥ न च मृत्युभयं तस्य प्रातःकालं च लङ्घयेत् ॥ अपमृत्युभयं तस्य प्रणश्यति न संशयः ॥ ३६ ॥ व्याधयो नोपपद्यन्ते नोपसर्गभयं भवेत् ॥ प्रत्यासन्नान्तरे काले शतैकावर्तने कृते ॥ ३७ ॥ मृत्युर्नजायते तस्य रोगान्मुञ्चति निश्चितम् ॥ पञ्चम्यां वा दशम्यां वा पौर्णमास्यामथापि वा ॥ ३८ ॥ शतमावर्तयेद्यस्तु शतवर्षं स जीवति ॥ तेजस्वी बलसम्पन्नो लभते श्रियमुत्तमाम् ॥ ३९ ॥ त्रिविधं नाशयेत् पापं मनो

वाक्कायसम्भवम् ॥ अभिचारणि कर्माणि कर्माण्याथर्वणानि च ॥ क्षीयन्ते नात्र सन्देहो दुःस्वप्नश्च विनश्यति ॥ ४० ॥ इदं रहस्यं परमं देवदेवस्य शूलिनः ॥ दुःस्वप्ननाशनं पुण्यं सर्वविघ्नविनाशनम् ॥ ४१ ॥

इति श्री शिवब्रह्मसंवादे श्री मृत्युजयस्तोत्रं सम्पूर्णम् ॥

ॐ नमो भगवते मृत्युञ्जयाय ॥ ततो विष्णवर्पितमना मार्कण्डेयो महामतिः ॥ तुष्टाव प्रणतो भूत्वा देवदेवं जनार्दनम् ॥ १ ॥ विष्णुनैवोपदिष्टं तु स्तोत्रं कर्णे महामनाः ॥ सम्भावितेन मनसा तेन तुष्टाव माधवम् ॥ २ ॥ ॐ नमो भगवते वासुदेवाय ॥ नारायणं सहस्राक्षं पद्मनाभं पुरातनम् ॥ प्रणतोऽस्म हृषीकेशं किं मे मृत्युः करिष्यति

॥ ३ ॥ गोविन्दं पुण्डरीकाक्षमनन्तमजमव्ययम् ॥ केशवं च प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥ ४ ॥ वाराहं वामनं विष्णुं नारसिंहं जनार्दनम् ॥ माधवञ्च प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥ ५ ॥ पुरुषं पुष्करं पुण्यं क्षेमबीजं जगत्-पतिम् ॥ लोकनाथं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥ ६ ॥ भूतात्मानं महात्मानं जगद्योनिमयोनिजम् ॥ विश्वरूपं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥ ७ ॥ सहस्रशिरसं देवं व्यक्ताव्यक्तं सनातनम् ॥ महायोगं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति ॥ ८ ॥ इत्युदीरितमाकर्ण्य स्तोत्रं तस्य महात्मनः ॥ अपयातस्ततो मृत्युर्विष्णुदूतैश्च पीडितः ॥ ९ ॥ इति तेन जितो

मृत्युर्मार्कण्डेयेन धीमता ॥ प्रसन्ने पुण्डरीकाक्षे नृसिंहे नास्ति दुर्लभम् ॥ १० ॥ मार्कण्डेयहितार्थाय स्वयं विष्णुरुवाच ह ॥ ११ ॥ य इदं पठते भक्त्या त्रिकालं नियतः शुचिः ॥ नाकाले तस्य मृत्युः स्यान्नरस्याच्युतचेतसः ॥ १२ ॥ हृत्पद्ममध्ये पुरुषं पुराणं नारायणं शाश्वतमादिदेवम् ॥ संचिन्त्य सूर्यादपि राजमानं मृत्युं स योगी जितवाँस्तदैव ॥ १३ ॥

इति श्रीनरसिंहपुराणे मार्कण्डेयकृतशनिमृत्युञ्जयस्तोत्रं समाप्तम् ॥

मार्त्तण्डभैरवतन्त्रोक्तम्

महाकालशनैश्चरस्तोत्रम्

श्रीगणेशाय नमः ॥ ॐ शनैश्चराय नमः ॥ नीलाद्रिशोभाञ्चित-दिव्यमूर्तिः, खड्गी त्रिदण्डी शरचापहस्तः ॥ शम्भुर्महाकालशनिः पुरारिर्जयत्यशेषासुरनाशकारी ॥ १ ॥ मेरुपृष्ठे समासीनं सामरस्ये स्थितं शिवम् ॥ प्रणम्य शिरसा गौरी पृच्छति स्म जगद्धितम् ॥ २ ॥ पार्वत्युवाच ॥ भगवन् देवदेवेश भक्तानुग्रहकारक ॥ अल्पमृत्युविनाशाय यत्त्वया पूर्वसूचितम् ॥ ३ ॥ तदेव त्वं महाबाहो लोकानां हितकारकम् ॥

तव मूर्तिप्रभेदस्य महाकालस्य सांप्रतम् ॥ ४ ॥ शनिमृत्युञ्जयस्तोत्रं ब्रूहि मे नेत्रजन्मनः ॥ अकालमृत्युहरणमपमृत्युनिवारणम् ॥ ५ ॥ शनिमन्त्रप्रभेदा ये तैर्युक्तं यत्स्तवं शुभम् ॥ प्रतिनाम चतुर्थ्यन्तं नमोऽन्तं मनुना युतम् ॥ ६ ॥ श्रीईश्वर उवाच ॥ नित्ये प्रियतमे गौरि सर्वलोकहितं रते ॥ गुह्याद्गुह्यतमे दिव्यं सर्वलोकोपकारकम् ॥ ७ ॥ शनिमृत्युञ्जयस्तोत्रं प्रवक्ष्यामि तवाऽधुना ॥ सर्वमङ्गलमाङ्गल्यं सर्वशत्रु-विमर्दनम् ॥ ८ ॥ सर्वरोगप्रशमनं सर्वापद्विनिवारणम् ॥ शरीरारोग्य-करणमायुर्वृद्धिकरं नृणाम् ॥ ९ ॥ यदि भक्तासि मे गौरि गोपनीयं प्रयत्नतः । गोपितं सर्वतन्त्रेषु तच्छृणुष्व महेश्वरि ॥ १० ॥

ॐ अस्य श्रीमहाकालशनिमृत्युञ्जयस्तोत्रमन्त्रस्य पिप्पलादऋषिरनुष्टुप्छन्दो महाकालशनिर्देवता शं बीजमायनसी शक्तिः ॥ कालपुरुषायेति कीलकं महाकालापमृत्युनिवारणार्थे पाठे विनियोग ॥ ऋष्यिन्यासं करन्यासं देहन्यासं समाचरेत् ॥ महोग्रं मूर्ध्नि विन्यस्य मुखे वैवस्वतं न्यसेत् ॥ ११ ॥ गले तु विन्यसेन्मन्दं बाह्वोर्महाग्रहं न्यसेत् ॥ हृदि न्यसेन्महाकालं गुह्ये कृतशनुं न्यसेत् ॥ १२ ॥ जान्वोस्तूडुचरं न्यस्य पादयोस्तु शनैश्चरम् ॥ एवं न्यासविधिं कृत्वा पश्चात् कालात्मनः शनेः ॥ १३ ॥ न्यासं ध्यानं प्रवक्ष्यामि तनौ ध्यात्वा पठेन्नरः ॥ कल्पादियुगभेदाँश्च कराङ्गन्यासरूपिणः ॥ १४ ॥ कालात्मनो न्यसेद्गात्रे मृत्युञ्जय

नमोऽस्तु ते ॥ मन्वन्तगणि सर्वाणि महाकाल - स्वरूपिणः ॥ १५ ॥ भावयेत् प्रति-प्रत्यङ्गे महाकालाय ते नमः ॥ भावयेत्प्रभवाद्यब्दान् शीर्षे काल-जिते नमः ॥ १६ ॥ नमस्ते नित्यसेव्याय विन्यसेदयने भ्रुवोः ॥ सौरये च नमस्तेऽस्तु गण्डयोर्विन्यसेद्दतून् ॥ १७ ॥ श्रावणं भावयेदक्ष्णोर्नम' कृष्णनिभाय च ॥ महोग्राय नमो भाद्रं तथा श्रवणयोर्न्यसेत् ॥ १८ ॥ नमो वै दुनरीक्ष्याय चाश्विन विन्यसेन्मुखे ॥ नमो नीलमयूखाय ग्रीवायां कार्तिकं न्यसेत् ॥ १९ ॥ मार्गशीर्षं न्यसेद्बाह्वोर्महारौद्राय ते नमः ॥ ऊर्ध्वलोकं निवासाय पौषं तु हृदये न्यसेत् ॥ २० ॥ नमः कालप्रबोधाय माघं वै चोदरं न्यसेत् ॥ मन्दगाय नमो मेढ्रे न्यसेद्वै

फाल्गुनं तथा ॥ २१ ॥ ऊर्व्योर्न्यसेच्चैत्रमासं नमः शिवोद्भवाय च ॥ वैशाखं विन्यसेज्जान्वोर्नमः संवर्तकाय च ॥ २२ ॥ जङ्घयोर्भावयेज्ज्येष्ठं भैरवाय नमस्तथा ॥ आषाढं पादयोश्चैव शनये च नमस्तथा ॥ २३ ॥ कृष्णपक्षं च क्रूराय मम आपादमस्तके ॥ न्यसेदार्शीर्षपादान्ते शुक्लपक्षं ग्रहाय च ॥ २४ ॥ न्यसेन्मूलं पादयोश्च ग्रहाय शनये नमः ॥ नम सर्वजिते चैव तोयं सर्वांगुलौ न्यसेत् ॥ २५ ॥ न्यसेद्गुल्फद्वये विश्वं नमः शुष्कनराय च ॥ विष्णुभं भावयेज्जङ्घ्योभयशिष्टतमाय ते ॥ २६ ॥ जानुद्वये धनिष्ठां च न्यसेत् कृष्णरुचे नमः ॥ ऊरुद्वये वारुणर्क्षं न्यसेद् कालभृते नमः ॥ २७ ॥ पूर्वभाद्रं न्यसेन्मेढ्रे जघजटधराय च ॥ पृष्ठे उत्तरभाद्रं च कपालाय नमस्तथा ॥ २८ ॥

रेवतीं च न्यसेन् नाभौ नमो मंदचराय च ॥ गर्भदेशे न्यसेद्वस्त्रं नमः श्यामतराय च ॥ २९ ॥ नमो भोगिस्रजे नित्यं यमं स्तनयुगे न्यसेत् ॥ न्यसेत्कृत्तिकां हृदये नमस्तैलप्रियाय च ॥ ३० ॥ रोहिणीं भावयेद्धस्ते नमस्ते खड्गधारिणे ॥ मृगं न्यसेद्वामहस्ते त्रिदण्डोल्लसिताय च ॥ ३१ ॥ दक्षोर्ध्वे भावयेदार्द्रं नमो वै बाणधारिणे ॥ पुनर्वसुमूर्ध्वभागे नमो वै चाप-धारिणे ॥ ३२ ॥ तिष्यं न्यसेद्दक्षबाहौ नमस्ते हरमन्यवे ॥ सार्पं न्यसेद्वामबाहौ चोग्रचापाय ते नमः ॥ ३३ ॥ मघां विभावयेत्कण्ठे नमस्ते भस्मधारिणे ॥ मुखे न्यसेद्भगर्क्षं च नमः क्रूग्रहाय च ॥ ३४ ॥ भावयेद्दक्षनासायामर्यमाणं च योगिने ॥ भावयेद्वामनासायां हस्तर्क्षं धारिणे नमः ॥ ३५ ॥

त्वाष्ट्रं न्यसेद्दक्षकर्णं कृसरान्नप्रियाय ते ॥ स्वातीं न्यसेद्वामकर्णं नमो ब्रह्ममयाय ते ॥ ३६ ॥ विशाखां च दक्षनेत्रे नमस्ते ज्ञानदृष्टये ॥ मैत्रं न्यसेद्वामनेत्रे नमोऽन्धलोचनाय ते ॥ ३७ ॥ शार्क न्यसेच्च शिरसि नमः सम्वर्तकाय च ॥ विष्कम्भं भ वयेच्छीर्षे सन्धौ कालाय ते नमः ॥ ३८ ॥ प्रतियोगं भ्रुवोः सन्धौ महामन्दं नमोऽस्तु ते ॥ नेत्रयोः सन्धावायुष्मद्योगं भीष्याय ते नमः ॥ ३९ ॥ सौभाग्यं भावयेन्नासा-सन्धौ फलाशनाय च ॥ शोभनं भावयेत्कर्णासन्धौ पुण्यात्मने नमः ॥ ४० ॥ नमः कृष्णायातिगण्डं हनुसन्धौ विभावयेत् ॥ नमो निर्मांस-देहाय सुकर्माणं शिरोधरे ॥ ४१ ॥ धृतिं न्यसेद्दक्षबाहौ पृष्ठे छाया-

सुताय च ॥ तन्मूलसन्धौ शूलञ्च न्यसेदुग्राय ते नमः ॥ ४२ ॥ तत्कूर्परे न्यसेद्गण्डं नित्यानन्दाय ते नमः ॥ वृद्धिं तन्मणिबन्धे च कालज्ञाय नमो न्यसेत् ॥ ४३ ॥ ध्रुवं तदङ्गुलीमूलसन्धौ कृष्णाय ते नमः ॥ व्याघातं भावयेद्वामबाहुपृष्ठे कृशाय च ॥ ४४ ॥ हर्षणं तन्मूलसन्धौ भूतसन्तापिने नमः ॥ तत्कूर्परे न्यसेद्वज्रं सानन्दाय नमोऽस्तु ते ॥ ४५ ॥ सिद्धिं तन्मणिबन्धे च न्यसेत् कालाग्नये नमः ॥ व्यतीपातं कराग्रेषु न्यसेत्कालकृते नमः ॥ ४६ ॥ वरीयांसं दक्षपार्श्वे सन्धौ कालात्मने नमः ॥ परिघं भावयेद्वामपार्श्वसन्धौ नमोऽस्तु ते ॥ ४७ ॥ न्यसेद्दक्षोरुसन्धौ च शिवं वै कालसाक्षिणे ॥

तज्जानौ भावयेत्सिद्धिं महादेहाय ते नमः ॥ ४८ ॥ साध्यं न्यसेच्च तद्गुल्फसन्धौ घोराय ते नमः ॥ न्यसेत्तदङ्गुलीसन्धौ शुभं रौद्राय ते नमः ॥ ४९ ॥ न्यसेद्वामोरुसन्धौ च शुक्लं कालविदे नमः ॥ ब्रह्मयोगं च तज्जानौ न्यसेत्सद्योगिने नमः ॥ ५० ॥ ऐन्द्रे तद्गुल्फसन्धौ च योगाधीशाय ते नमः ॥ न्यसेत्तदङ्गुलीसन्धौ नमो भव्याय वैधृतम् ॥ ५१ ॥ चर्मणि बबकरणं भावयेद्यज्वने नमः ॥ बालवं भावयेद्रक्ते संहारक नमोऽस्तु ते ॥ ५२ ॥ कौलवं भावयेदस्थ्नि नमस्ते सर्व-भक्षिणे ॥ तैत्तिलं भावयेन्मांसे आममांसप्रियाय ते ॥ ५३ ॥ गरं न्यसेद्वपायां च सर्वग्रासाय ते नमः ॥ न्यसेद्वणिजं मज्जायां सर्वान्तक

नमोऽस्तु ते ॥ ५४ ॥ वीर्ये विभावये दृष्टिं नमो मन्यूग्रतेजसे ॥ रुद्र-मित्रपितृवसुवारीण्येताँश्च पञ्च च ॥ ५५ ॥ मुहूर्ताश्च दक्षपादनखेषु भावयेन्नमः ॥ खगेशाय च स्वस्थाय खेचराय स्वरूपिणे ॥ ५६ ॥ पुरुहूतशनमखे विश्वधेधाविधूँम्नथा ॥ मुहूर्ताश्च वामपादनखेषु भाव-येन्नमः ॥ ५७ ॥ सत्यव्रताय सत्याय नित्यसत्याय ते नमः ॥ सिद्धे-श्वर नमस्तुभ्यं योगेश्वर नमोऽस्तु ते ॥ ५८ ॥ वह्निनक्तंचराँश्चैव वरुणार्यमयोनिकान् ॥ मुहूर्ताश्च दक्षहस्तनखेषु भावयेन्नमः ॥ ५९ ॥ लग्नोदयाय दीर्घाय मार्गिणे दक्षदृष्टये ॥ वक्राय चातिक्रूराय नमस्ते वामदृष्टये ॥ ६० ॥ वामहस्तनखेष्वन्त्यवर्णेशाय नमोऽस्तु ते ॥

गिरिशाहिबुध्न्यपूषाजपादस्राँश्च भावयेत् ॥ ६१ ॥ राशिभोक्त्रे राशिगाय राशिभ्रमणकारिणे ॥ राशिनाथाय राशीनां फलदात्रे नमोऽस्तु ते ॥ ६२ ॥ यमाग्निचन्द्रादितिजविधातृंश्च विभावयेन् ॥ ऊर्ध्वहस्तदक्षनखेष्वन्यकालाय ते नमः ॥ ६३ ॥ तुलोच्चस्थाय सौम्याय नक्रकुम्भगृहाय च ॥ समीरत्वष्टृजीवाँश्च विष्णुतिग्मद्युतीन्न्यसेत् ॥ ६४ ॥ ऊर्ध्ववामहस्तनखेष्वन्यग्रहनिवारिणे ॥ तुष्टाय च वरिष्ठाय नमो राहुसखाय च ॥ ६५ ॥ रविवारं ललाटे च न्यसेद्भीमदृशे नमः ॥ सोमवारं न्यसेदास्ये नमोऽमृतप्रियाय च ॥ ६६ ॥ भौमवारं न्यसेत्स्वान्ते नमो ब्रह्मस्वरूपिणे ॥ मेढ्रे न्यसेत्सौम्यवारं नमो जीवस्य-

रूपिणे ॥ ६७ ॥ वृषणे गुरुवारं च नमो मन्त्रस्वरूपिणे ॥ भृगु-
वारं मलद्वारे नमः प्रलयकारिणे ॥ ६८ ॥ पादयोः शनिवारं च निर्मांसाय
नमोऽस्तु ते ॥ न्यसेत्केशेषु घटिकां नमस्ते सूक्ष्मरूपिणे ॥ ६९ ॥ एवं
न्यासविधिं कृत्वा ततो ध्यात्वा पठेन्नरः ॥ ध्यानं तस्य महेशानि शृणु
वक्ष्यामि वन्दिते ॥७०॥ ध्यायेन्नालं शनिघोरं त्रिपुरारिं त्रिदण्डकम् ॥ खड्गं
हस्ते दधानं तं वामदक्षिणयोः क्रमात् ॥ गृध्रापरिगतं शुष्कं दीर्घाङ्गं काल-
मोचनम् ॥७१॥ महाकालं शनिं शम्भुं त्रिपुरारिं त्रिलोचनम् ॥ महोग्रं क्रूर-
कर्माणां देवदेवं शनैश्चरम् ॥७२॥ कालरूपिन्नमस्तेऽस्तु सर्वपापप्रणाशकः ॥
त्रिपुरस्य वधार्थाय शम्भुजाताय ते नमः ॥ ७३ ॥ नमः कालशरीराय

कालानुनय ते नमः ॥ कालहेनोः नमस्तुभ्यं कालनन्दाय वै नमः ॥ ७४ ॥ अखण्डदण्डमानाय त्वनाद्यन्ताय वै नमः ॥ कालदेवाय कालाय कालकालाय ते नमः ॥ ७५ ॥ निमेषादिमहाकल्पकालरूपं च भैरवम् ॥ मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम् ॥ ७६ ॥ दातारं सर्वभव्यानां भक्तानामभङ्करम् ॥ मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम् ॥ ७७ ॥ कर्त्तारं सर्वदुःखानां दुष्टानां भयवर्धनम् ॥ मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम् ॥ ७८ ॥ हर्त्तारं ग्रहजातानां फलानामघकारिणाम् ॥ मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम् ॥ ७९ ॥ सर्वेषामेव भूतानां सुखदं शान्तमव्ययम् ॥ मृत्युञ्जयं महा-

कालं नमस्यामि शनैश्चरम् ॥ ८० ॥ कारणं सुखदुःखानां भावाभावस्वरूपिणम् ॥ मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम् ॥ ८१ ॥ अकालमृत्युहरणमपमृत्युनिवारणम् ॥ मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम् ॥ ८२ ॥ कालरूपेण संसारं भक्षयन्तं महाग्रहम् ॥ मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम् ॥ ८३ ॥ दुर्निरीक्ष्यं स्थूलरोमं भीषणं दीर्घलोचनम् ॥ मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम् ॥ ८४ ॥ ग्रहाणां ह्यग्रभूतं च सर्वग्रहनिवारणम् ॥ मृत्युञ्जयं महाकालं नमस्यामि शनैश्चरम् ॥ ८५ ॥ कालस्य वशगाः सर्वे न कालः कस्यचिद्वशः ॥ तस्मात्त्वां कालपुरुषं प्रणतोऽस्मि शनैश्चरम् ॥ ८६ ॥

कालादेव जगत्सर्वं काल एव विलीयते ॥ कालरूपं स्वयं शम्भुः कालात्मा ग्रहदेवता ॥ ८७ ॥ चण्डीशोरुद्डाकिन्याक्रान्तश्चण्डीश उच्यते ॥ विद्युदाकलितो नद्यां समारूढो समाधिपः ॥ ८८ ॥ चण्डीशः शुकसंयुक्तो जिह्वया ललितः पुनः ॥ ज्ञतजस्तामसी शोभी स्थिरात्मा विद्युता युतः ॥ ८९ ॥ नमोऽन्तो मुनिरित्येव शनितुष्टिकरः शिवे ॥ आद्यन्तश्लोत्तरशतं मनुनेनं जपेन्नरः ॥ ९० ॥ यः पठेच्छृणुसाद्वापि ध्यात्वा संम्पूज्य भक्तितः ॥ तस्य मृत्योर्भयं नैव शतवर्षावधिं प्रिये ॥ ९१ ॥ ज्वरा सर्वे विनश्यन्ति दद्रुविस्फोटकच्छुकाः ॥ दिवा सौरिं स्मरेत् रात्रौ महाकालं यजम् पठेत् ॥ ९२ ॥ जन्मर्क्षे च यदा सौरि-

र्जपेदेतत्सहस्रकम् ॥ वेधगे वामवेधे वा जपेदर्द्धसहस्रकम् ॥ ९३ ॥
द्वितीये द्वादशे मन्दे तनौ वा चाष्टमेऽपि वा ॥ तत्तद्राशौ
भवेद्यावत् पठेत्तावद्दिनावधि ॥ ९४ ॥ चतुर्थे दशमे वापि सप्तमे
नवपञ्चमे ॥ गोचरे जन्मलग्नेशे दशाम्वन्तर्दशासु च ॥ ९५ ॥
गुरुलाघवज्ञानेन पठेदावृत्तिसंख्यया ॥ शतमेकं त्रयं वाऽथ शतयुग्म
कदाचन ॥ ९६ ॥ आपदस्तस्य नश्यन्ति पापानि च क्षयं भवेत् ॥
महाकालालये पीठे ह्यथवा जलसन्निधौ ॥ ९७ ॥ पुण्यक्षेत्रेऽश्वत्थमूले
तैलकुम्भाग्रतो गृहे ॥ नियमेनैकभक्तेन ब्रह्मचर्येण मौनिना ॥ ९८ ॥
श्रोतव्यं पठितव्यं च साधकानां सुखावहम् ॥ परं स्वस्त्ययनं पुण्यं

स्तोत्रं मृत्युञ्जयाभिधम ॥ ९९ ॥ कालक्रमेण कथितं न्यासक्रमसमन्वितम् ॥ प्रातःकाले शुचिर्भूत्वा पूजायां च निशामुखे ॥ १०० ॥ पाठनां नैव दुष्टेभ्यो व्याघ्रसर्पादितो भयम् ॥ नाग्नितो न जलाद्वायोर्देशे देशान्तरेऽथ वा ॥ १०१ ॥ नाकाले मरणं तेषां नापमृत्युभयं भवेत् ॥ आयुर्वर्षशतं साग्रं भवन्ती चिरजीविनः ॥ १०२ ॥ नातः परतरं स्तोत्रं शनिदुष्टकरं महत् ॥ शान्तिकं शीघ्रफलदं स्तोत्रमेतन्मयोदितम् ॥ १०३ ॥ तस्मात् सर्वप्रयत्नेन यदिच्छेदात्मनो हितम् ॥ कथनीय महादेवि नैवाभक्तस्य कस्यचित् ॥ १०४ ॥

इतिमार्तण्डभैरवतन्त्रे महाकालशनैश्चरस्तोत्रं सम्पूर्णम् ॥

ठूलो-सानो स्वस्थानी
तथा
हरेक किसिमका
धार्मिक पुस्तकहरुका लागि
सम्पर्क होस्

रत्न पुस्तक भण्डार
पोस्ट बाक्स 98
काण्ठमाण्डौं, नेपाल